# pa nchadevatAstotram

# પઞ્ચદેવતાસ્તોત્રમ્

## Document Information

Text title : panchadevatAstotram

File name : panchadevatAstotram.itx

Category : shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : June 5, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# પઞ્ચદેવતાસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
ગણેશવિષ્ણુસૂર્યેશદુર્ગાખ્યં દેવપઞ્ચકમ્ ।
વન્દે વિશુદ્ધમનસા જનસાયુજ્યદાયકમ્ ॥ ૧॥

એકરૂપાન્ ભિન્નમૂર્તીન્ પઞ્ચદેવાન્નમસ્કૃતાન્ ।
વન્દે વિશણુદ્ધભાવેનેશામ્બેનૈકરદાચ્યુતાન્ ॥ ૨॥

કલ્યાણદાયિનો દેવાન્નમસ્કાર્યાત્મહૌજસઃ ।
વિષ્ણુશમ્ભુશિવાસૂયગણેશાખ્યાન્નમામ્યહમ્ ॥ ૩॥

એકાત્મનો ભિન્નરૂપાન્ લોકરક્ષણતત્પરાન્ ।
શિવવિષ્ણુશિવાસૂર્યહેરમ્વાન્ પ્રણમામ્યહમ્ ॥ ૪॥

દિવ્યરૂપાનેકરૂપાન્નાનારૂપાન્નમસ્કૃતાન્ ।
શિવાશઙ્કરહેરમ્બવિષ્ણુસૂર્યાન્નમામ્યહમ્ ॥ ૫॥

નિત્યાનાનન્દસન્દોહદાયિનો દીનપાલકાન્ ।
શિવાચ્યુતગણેશેનડુર્ગાખ્યાન્ નૌમ્યહં સુરાન્ ॥ ૬॥

કમનીયતનૂન્દેવાન્ સેવાવશ્યાન્ કૃપાવતઃ ।
શઙ્કરેનશિવાવિષ્ણુગણેશાખ્યાન્નમામ્યહમ્ ॥ ૭॥

સૂર્યવિષ્ણુશિવાશમ્ભુવિઘ્નરાજાભિધાન્સુરાન્ ।
એકરૂપાન્ સદા વન્દે સુખસન્દોહસિદ્ધયે ॥ ૮॥

હરૌ હરે તીક્ષ્ણકરે ગણેશે શક્તૌ ન ભેદો જગદાદિહિતેષુ ।
અધઃ પતન્ત્યેષુ ભિદાં દધાના ભાષાન્ત એવં યતતોઽચ્યુતાશ્રમાઃ ॥ ૯॥

ઇતિ શ્રીમદચ્યુતાશ્રમવિરચિતં પઞ્ચદેવતાસ્તોત્રમ્ સંપૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

*pa nchadevatAstotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*